CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.P.P.13

Coll. No. 814

Title Āśaucadaśaka bhāṣya

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 814 Subject : Dharmaśāstra

Title : Āśaucadaśakabhāṣya.

Author : Vigñaneśvara, Harihara. Scribe : Śivadeva.

Date of the work : — Date of the Ms. : V.S. [illegible]

Place of the work : — Place of the Ms. : Ahamedābāda.

Size : 9.3" by 4.2" Extent : 15 foll.

Language : Sanskrit Script : Devanāgari

Remarks : —

॥श्रीगणेशायनमः॥ ॥श्रीविज्ञानेश्वरविरचित।मुनिजनवाक्यैर्मिताक्षरामध्यमत।आ
शौचदशकंवृत्तं।वदतिहरिर्हरिहरौनत्वा॥१॥अत्रतावत्।श्रीविज्ञानेश्वरःयोगीन्द्रश्चतुर्व
र्णलोकस्यजन्मनिसूतिर्नवंसूतकं।मरणेशवत्नवंशावं।सूतकशावशुद्ध्यर्थंवृत्तदशकं॥
शार्दूलविक्रीडितेनचकार॥तत्राद्यंवृत्तमाह॥ ॥मातुर्गर्भविपत्त्वघंत्रिदिवसंमासत्रयेतोय
थामासाहंत्रिषुसूतकावधिरतःस्नानंपितुःसर्वदा।ज्ञातीनांपतनाद्विजातमरणेपित्रोर्द
शाहंसदानाम्नःप्राक्तदपैतिसूतकवशात्त्र्याब्दाद्दशाहंपरं॥१॥ ॥मासत्रयेमासत्रयम
ध्येएकद्वित्रिमासावधिमध्येयदिगर्भस्रावोद्रवरूपोऽप्रव्यक्तिलक्षणोभवति।तदामातुस्त्रि
दिवसंदिवसत्रयंशावंअघंभवति।किंतुएकस्मिन्मासे·तथापित्रिदिनमिति·एवंद्वयोरपि
त्रिष्वपिवा·न·पुनरेकस्मिन्मासेएकंदिनं·द्विमासेद्विदिनं·त्रिमासेत्रिदिनं·किंतुपितुर्जनक १
स्यसदासर्वदासचैलंशीतलजलस्नानं·नतुशावंस्यात्·यतःमासत्रयेत्र्यहमिति·गोतम

वचनात्·अतोमासाहंत्रिषु·अतोमासत्रयादूर्ध्वंचतुःपंचषष्ठमासेषु·यथामासाहं·अघमित्य
नुवर्त्तते·चतुर्थमासेदिनचतुष्टयंपंचमेपंच·षष्ठेषट्·यतःगर्भस्रावेमासतुल्यारात्रयः।स्त्री
णामाशौचं·स्नानमात्रमेवपुरुषस्येति·वशिष्ठसूतकावधिरतः॥अतःषण्मासाहूर्ध्वंसूत
कावधिर्दशरात्रमेव·मातापित्रोरघमित्यनुवर्त्तते·सूतकंस्यात्·अतोवक्ष्यति·नाम्नःप्राक्
तदपैतिसूतकवशादिति·सप्तममासाहूर्ध्वंप्रेतेबालेपितुःशावंसूतकमेवोच्यते·अतःद
शरात्रंस्वजातकर्मनाशौचंशौचमिष्यते·इतिस्मृत्यंतरं·स्नानंपितुःसर्वदा·पितुर्जनक
स्यसर्वदाप्रथममासादारभ्यशीतलजलस्नानमेव·यतःजातेपुत्रेपितुःस्नानं·सचैल
मभिधीयते·मातातुशुद्ध्येद्दशाहेन·स्नात्वातुस्पर्शनंपितुः॥इतिसंवर्त्तः॥ज्ञातीनांपतना
द्विजातयःसपिंडाआत्मानंधुरिकृत्वासप्तपुरुषावसानाः।तेषांपातःपंचमषष्ठयोरि
तिस्मृत्यंतरवाक्यात्·स्नानमात्रमवगतं·यतःसपिंडतातुपुरुषे·सप्तमेविनिवर्त्तते·इति

मनुः।स्नानंसद्यःशौचमितिसुमंतुः।ज्ञातमरणेपित्रोर्दशाहंसदा·ज्ञातेमृतेचज्ञातमरणे·तन
यदाज्ञातंमृतंवाभवति·तदापित्रोःसर्वदैवदशाहंसूतकंशौचंभवेदितव्यं·यतःज्ञातेमृतेम्
तज्ञातेवा·सपिंडानांदशरात्रमिति·हारीतः।अत्रसपिंडःपितैवगृह्यते·नाम्नःप्राक्तद
येतिसूतकवशात्·अत्रएकादशेऽहनिनाम।यतःनामकरणादर्वाक्शिशुर्मृतः।तत्रसू
तकवशात्जन्मदिनाद्दारभ्यअनंतरामृतेपिबालेदशाभिर्दिनैःशुद्धिः।ततःसूतकवशात्
अपैतिगच्छति·यतःदशाहाभ्यंतरेबाले·प्रमीतेतस्यबांधवैः।शावंशौचंनकर्तव्यं·सू
त्याशौचंविधीयते·इतिवृद्धमनुः।त्रातुर्दशाहंपरं·अहन्येकादशेनामइतियोगीश्वर
वचनात्·एकादशाहादारभ्यमृतेबालेत्रातुःसपिंडानांदशाऽमाशौचंस्यात्·एतदाशौचं
सपिंडविषयं·सपिंडाःपितृव्यकतत्सुतादयःयुक्तं।। शाहंपरमितिवाक्यात्·त्रा २
तरःसनाभयोनसपिंडाइति·यतःगर्भस्थेप्रेतेमातुर्दश। पतेऽन्ययोः।कृतनाम्नेस

दराणमितिपैग्यः।। ।।अथाद्वितीयंवृत्तमाह।। ।।ज्ञातीनांदशनात्क्षुरात्व्रतविधेःप्राग्
भवेदस्थ्यहंचूडात्प्राक्दहनाअयेपरमहर्निम्नोत्रदंतात्र्यहं।।त्यागेचैवमथव्रताद्दश
दिनंजन्मन्यपीक्षंसदामासंस्त्रसवेतुमातुरपरत्रैतद्दशाहाधिकं।।२।। ।।ज्ञातयःसपिं
डास्तेषांदशनात्दंतजननात्प्राक्आप्लवःस्नानमेवस्यात्·यतःअदंतजननेबालेप्रेतेस
द्यएव·नोस्याग्निसंस्कारः।नोदकक्रियेतिविष्णुः।क्षुरात्चूडात्प्राक्त्र्यहः।एकंदिनंशा
वंस्यात्·यतःदंतजाते·अकृतचूडेअहोरात्रेणशुद्धिरितिविष्णुः।व्रतविधेःप्राक्·उपवी
तादर्वाक्त्र्यहं·त्रिदिनं·शावंस्यात्·यत आदंतजननात्सद्य·आचूडान्नैशिकीक्रिय
त्रिरात्रमाव्रतादेशाद्दशरात्रमतःपरं·इतियोगीश्वरः।चूडात्प्राक्दहनाअयेपरमहर्
न्नः।परंनामकरणात्ऊर्ध्वंचूडात्प्राक्दहनाअयेकृतेदहनेत्र्यहः।शावंभवति·यतःसो
त्यग्निसंस्कारेत्र्यहःबालेषुचविशोधनमितिमनुः।दंतोत्र्यहंदंतात्परतोऽ·गमाह

चूडात् प्राक् अग्निसंस्कारैः अहं त्रिदिनं शावं भवति· यतः सद्यायकृतचूडौ वै· जातदंत
सुसंस्थितः। दाहयित्वा ततस्तेनं आशौचं त्र्यहमाचरेत्· इत्यंगिराः। त्यागे चैवं· त्यागशब्देन
भूमिनिक्षेप उच्यते· त्यागे निक्षेपे एवं त्रिदिनं शावं स्यात्· इत्यर्थः। नास्य कार्योग्निसंस्कारो
न कार्या चोदकक्रिया। अरण्ये काष्ठवत्त्यक्त्वा क्षिपेयुस्त्र्यहमेव तु· इति मनुः। काष्ठवदिति यया·
अरण्ये त्यक्त्वा स्यात् त्र्यहमास्यते· एवं शिशोरुभरि वाक्यार्थः। अथ व्रताद्दशदिनं· अथ व्रतात्
उपनीतात् व्रते माणवके दशदिनमाशौचं भवति· माणवको यतः दशरात्रं व्रतादेशाद्दिति· अ
त्यंतरं· जन्मन्यपीछं सदा· इछमिछमेव· दशरात्रं जन्मनि पितृमातृभ्रातृसपिंडानां सदा सर्व
देवसूतिभवं आशौचं स्यात्· यतः जनने प्येवमेवं स्यात्· मातापित्रोस्तु सूतकं। सूतकं मातु
रेवस्यादुपस्पृश्य पिता शुचिः। नतु पितुः स्नाने स्पर्शयोग्यत्वं स्यादित्यर्थः। न पुनः कर्माधिका
रे· तथा च· सूतिकासर्ववर्णानां दशाहेन विशुद्ध्यति· सूतौ च पृथक् शौचं· सर्ववर्णेष्वयं विधिः। ३

इति वृद्धप्रचेताः। मासं पुंसवनेनु मातुरपरत्रैतद्दशाहाधिकं· मातुर्जनन्याः पुंसवने जन्मनि
अस्पर्शदिनदशकेन सह पृथक् विंशतिनिर्दिनैर्मासमाशौचं· तथा परत्र कन्याजन्मनि ए
तन्मासलक्षणं· आशौचं दशाहाधिकं चत्वारिंशद्दिनानि भवंति· यतः सूतिकां पुत्रवतीं विं
शतिरात्रेण कर्माणि कारयेत्· मासेन स्त्री जननीमिति· पैठीनसिः। अस्पर्शदिन १० तथास्प
र्शदिन २०॥ ३०॥ उभयमाशौचं· यतो लोकेपि मासिकं स्नानं सूतिकाया इति प्रसिद्धः। यथा ज
न्मनि अस्पर्शदिन १० यथा अस्पर्शदिन ३० उभयं दिन ४० एतदेव भवति॥ २॥ ॥अथ तृतीयं
वृत्तमाह॥ ॥कन्यास्वाप्लुतिराक्षुरादथ दिनं द्वाभ्ये त्र्यहं [illegible] त्युक्तं तु संभवे पितृकु
लस्योढासु नत्रिर्भवेत्। सूतास्वाप्लुतासु वा पितृगृहे तस्य[illegible] दिनं तत्पक्षस्य परा श्रयो
स्त्वपि तथा नत्रो श्रितत्पक्षयोः॥ ३॥ ॥कन्यास्वाप्लुतिराक्षुरात्· कन्यासु आक्षुरान्मृतासु आप्लु
तिः स्नानमात्रं सर्वेषां क्षुरकर्मणि· कुलाचारतोपि वर्षद्वि वर्षपर्यंतं गृह्यते· वर्षद्वयाद्दु अकृतसौ

रोपि क्षौरसंस्कारः। यतः ऊनद्विवार्षिकं प्रेतमिति यतः अकृतचूडायां कन्यायां सद्यः शौचं वि
धीयते इत्यापस्तंबः॥ अथ चूडाकरणादुपरि प्रेतायां दिनमाशौचं अहस्त्वदत्तकन्यासु इ
ति योगीश्वरः। दानेत्र्यहंचीजयोः। वाक्दाने कृते सति पत्युर्विदितायां मृतायां कन्यायां उभ
योः पितृश्वशुरपक्षयोस्त्र्यहं शावं स्यात् यत स्त्रीणामसंस्कृतानां तु त्र्यहात् शुध्यंति बांधवाः।
यथोक्तेनैव कल्पेन शुध्यंति तु सनाभयः। इति मनुः। बांधवाः परपक्षाः। सनाभयः पितृपक्षाः।
असंस्कृता वाग्दत्ता अपरिणीता यथोक्तः कल्पः। अपरिणीतायामपि मृतायां यथोक्तकल्पः
दशाहं सनाभयः पितृपक्षास्तेषां शावं भवतीत्यर्थः। ज्ञात्युक्तं त्वनुसंभवे पितृकुलस्य जनक
पक्षस्य कन्याया अपरिणीताया अनुमत्या अष्टवर्षादूर्ध्वं एकादशवर्षे वा अनुमत्या अपि
मरणे ज्ञात्युक्तं विप्रक्षत्रादिकं तस्मात् तन्नवति यतः विवाहयेदष्टवर्षां एवं धर्मो न हीयते इति ४
मनुः। अतः अष्टवर्षादूर्ध्वं अनूढायाः परिपूर्णमाशौचं। अष्टवर्षा भवेद्गौरी नववर्षा च रोहिणी।

दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला॥ इति स्मृत्यंतरे। ऊढासु भर्त्तुर्भवेत् ऊढासु परिणी
तासु भर्त्तुरेवाशौचं स्यात् यच्चासंस्कृतासु स्त्रीषु नाशौचं पितृपक्षे इति विष्णुः। सूतास्वासु
मृतासु वा पितृगृहे तस्य त्रिरात्रं दिनं तत्पक्षस्य आसु एतासु कन्यासु पितृगृहे जनकसद्मनि
सूतासु प्रसूतासु मृतासु प्रेतासु वा तस्य जनकस्य पितुः त्रिदिनं सूतासु सूतकं मृतासु शा
वं स्यात् तत्पक्षस्य पितृव्यकादेर्दिनं भवति यतस्तत्र प्रसवे मरणे वा पितृगृहे स्यातां तदेक
रात्रं त्रिरात्रमिति विष्णुः। प्रसवे एकरात्रं मरणे त्रिरात्रमित्यर्थः। पराश्रयास्वपि तथा भर्तृपि
तत्पक्षयोः। पराश्रयासु एकभर्त्तारं त्यक्त्वा अपरं भर्त्तारं प्रतिगतासु तत्पक्षयोः। पूर्वापरभ
र्त्रोः कानवेयोः त्रिरात्रमाशौचं यतः परपूर्वासु भार्यासु प्रसूतासु वा त्रिरात्रमिति विष्णुः। त्रि
रात्रं प्राकृतं ऊढस्त्रीणां पित्रोरुपरमे इति त्रिरात्रमिति बौधायनः। संप्रति विशेषः विश्वाद
र्शे प्रत्तस्त्रीणां त्रिरात्रं पितृविपद्भिर्भवेत् परिणीतस्त्रीणां पितृमातृविपदि मरणे सति त्रिरा

त्रमाशौचंनभवति·अत्रपितृग्रहणात्पितृव्यकोपिगृह्यते॥३॥ ॥अथचतुर्थवृत्तमाह॥ ॥
दाहाद्यादिनवह्निकेषुमरणाद्यंतेषुतेषांपुनःसंस्कारेअहमाहिताग्निविषयेनस्मिन्दशा
हत्वघं॥शिष्टाहंविदितेंतरादशदिनेतीतेत्र्यहंचाप्लवोत्यहेस्यादतिकालजननेनैवानुपे डेन
ता त्योत्यये॥४॥ ॥दाहाद्याहितवह्निकेषुमरणाद्यन्येषु·आहिताग्नेषुयाज्ञिकेषुमृतेषु
दाहदिनादारभ्यशावंभवति·अनग्निषुतुमरणदिनादारभ्यस्यात्·यतःमरणादेवकर्त्तव्यं·
संयोगोयस्यनाग्निना·दाहादूर्ध्वंशौचंस्यात्·वैतानकोविधिः।इतिशंखः।मृतादूस्तुयथाग्नि
विधिर्त्यंगिराः।तेषांपुनःसंस्कारेत्र्यहं·तेषांनिरग्निकानांपुनःसंस्कारेदग्धपुत्तलकेत्र्यहं॥
आशौचं·आहिताग्निविषयेतस्मिन्दशाहंत्वघं·आहिताग्निविषयेसाग्निकसंबंधेतस्मिन्
पुनर्दाहपुत्तलकेविषयेदशाहंदशाहंदिनंतुपुनःआशौचंप्रवर्त्तते·यतःआहिताग्निश्चप्रसव ५
म्रियते·पुनःसंस्कारंकृत्वाशावंवत्शौचं·अनाहिताग्नित्रिरात्रमितिवसिष्ठः।शावंवहदशाहमि

तिवाक्यार्थः।शिष्टाहंत्रिरात्रेंतरा·अंतरादशदिनमध्येविदितेज्ञातेसूतकेशावंवाशिष्टाहंशेषं
दिवसैःशुद्धिः।यतःविगतंतुविदेशस्थंशृणुयाद्योह्यनिर्दशं·यच्छेषंदशरात्रस्यतावदेवा
शुचिर्भवेदितिस्मृत्यंतरे·दशाहेनेतीतेत्र्यहं·दशदिनेष्वतिक्रांतेषुत्र्यहंदिनंशावंस्या
त्·यतःअतिक्रांतेदशाहेतुपश्चाज्ज्ञानातियोगृही·त्रिरात्रंसूतकंतस्यनतद्व्यस्यक
ह्रिचित्·इतिस्मृत्यंतरं·नायदीनांनाशौचं·आप्लवोत्यहेस्यात्·अत्ययेअतिक्रांते
आप्लवःस्नानमात्रंस्यात्·यतःनिर्दशंज्ञातिमरणं·श्रुत्वापुत्रस्यजन्मच·सवासज
लमाप्लुत्यशुद्धोभवतिमानवः।इतिमनुः।निर्दशमितिअत्यहे·व्याख्येयं·अतिकालजे
नजनने·जन्मसूतकंअतिकालजंबकुदिनजातंनस्यात्·यतःनाशुद्धिःप्रसवाशौचे
व्यतीतेषुदिनेष्वपि·इतिदेवलः।किंतुपितुःस्नानमेव·सपिंडानांजन्मशौचंनहि।पितरौ
वुमृतोस्यातांदूरस्थोपिहिपुत्रकः।श्रुत्वातद्दिनमारभ्यदशाहंसूतकंभवेत्·इतिपैठी

नसि:।नैवानुपेतात्यये॰ अदत्तोपवीतमरणेबकुदिनातिक्रांतेपिनशावं॰ यतःबालदेशांतर
मतप्रव्रजितानांसपिंडानांसद्यःशौचं॰ तथाजातमात्रशिशुत्वात्यावद्दंष्टोसमाध्वतस
तुगर्न्नसमोऽशेयोव्यक्तिमात्रप्रदर्शकः।इतिबालानां।।४।। ।।अथपंचमंदृत्तमाह।। ।।
शुद्धिःपूर्वसमाप्तितःसदृशयोर्योगेग्निदंसूतिकांद्विते वंमृतजन्मनोमृतवशात्गुर्वल्प
योर्दीर्घतः।अल्पात्यंचदिनाधिकादृशादिनीगच्छेदृशाद्धागतःपूर्वस्यांत्यदिने यदिद्वि
दिवसात्शुद्ध्यन्त्रनातेत्र्यहात्।।५।। ।।शुद्धिःपूर्वसमाप्तितःसदृशयोर्योगेग्निदंसूति
कांद्वित्वासदृशयोर्योगेशावयोःसूतकयोर्वासदृशयोर्योगेतुल्ययोरैक्येपूर्वसमाप्ति
तः।पूर्वस्यशेषेणअपारंद्वितीयमपितुल्यमशौचंशुद्ध्यति॰ पूर्वस्यसमाप्त्याअपरस्य
तुल्यस्यशुद्धिः।अग्निदंयेनप्रेतस्यअग्निर्दत्तः।।तंविनातथाच॰ गोत्रजस्तंगृहीत्वाचि ६
तामारोपयेन्नदा॰ इतिषट्त्रिंशन्मतं॰ तथाप्रेतसंस्पर्शनोब्राह्मणस्यदशरात्रमाशौचं॰ ।।

राजन्यस्यअर्द्धमासं॰ वैश्यस्यशूद्रस्याधिकारोनास्तिप्रतिषेधः।त्रिंशदहोरात्राणीत्येके॰ इति
शंखः।गोत्रजः अग्निदातासएवप्रेतसंस्पर्शाद्दशरात्रमाशौचं॰ यद्यपिपूर्वशौचेनपश्चि
माशौचंउपरतं॰ तथापिपश्चिमाशौचाग्निदःदशरात्रमेवाशौचवान्नवतीतिवाक्यार्थः।।
एवंसूतिकासर्ववर्णजोअपिदशरात्रसूतकन्नागिन्योनवंति॰ सर्ववर्णसूतिकानांदशरा
त्रसूतकप्राप्तिः।प्राक्अभिहिताः।यतःसूतकेसूतकंचेद्योयद्यपिस्यात्कथंचन॰ तद्धेषे
णेवशुद्ध्यंतिमृतकेमृतकंतथा॰ इतिअंगिराः।मृतजन्मनोर्मृतवशात्एकस्यमृतस्यानुय
द्विजन्मअथवाएकस्यजातस्यवानुपरंमृतंतदामृतजन्मनोर्मृतवशेनमरणाज्जन्मदिनैरे
वजन्मसूतकंशुद्ध्यतीति॰ यतःसूतकेमृतकंचेस्यान्मृतकेसूतकंतथा॰ तथाधिकृत्यमृत
कंशौचंकुर्यात्रसूतकं॰ इत्यंगिराः।गुर्वल्पयोर्दीर्घतः।स्वल्पकालाशौचमध्येयदिदीर्घका
लंआशौचंनिपतितं॰ ततोनपूर्वशेषेणशुद्धिरपैति॰ पश्चात्पतितसमाप्त्यां॰ यतःअद्वोह

द्धिमदाशौचं· पञ्चमेनसमापयेत्· अंतर्दशाहे कृत्वानुशेषकालमुपावसेत्· इतिमनुः।स्व
ल्पाशौचस्यमध्येतु दीर्घाशौचं नवेप्यदि· नपूर्वशेषेण शुद्धिः स्वकालेनैवशुद्ध्यति· इत्युशनाः।
आद्यंश्राद्धमशुद्धोपिकुर्यादेकादशेहनि· कर्तुस्तात्कालिकीशुद्धिरशुद्धः पुनरेवसः।अ
ल्पात्पंचदिनाधिकाद्दशादिनंगच्छेत्· अत्रतावत्त्रिरात्रंशावमाशौचं दृष्यते· वाक्यात्आ
शौचयोः पंचदिनस्यप्राप्तिर्नास्तितत्कथं· अल्पात्पंचदिनान्युक्तंसत्यंयदा विगतंतु विदेश
स्थंशृणुयाद्योह्यनिर्दशं· यच्छेषंदशरात्रस्यतावदेवाशुचिर्भवेत्· इतिवाक्यात्· चतुर्दिनं
घ्नतीतेषुक्तेदशरात्रमाशौचे· षड्रात्रादीनांसंभवोस्त्येव· किंतुतदपिदशाहांगत्वंतं· अतोअ
ल्पात्क्षशेषपंचदिनाधिकात्तस्यव्यपगमेअपरस्यशुद्धिरयुक्तमयुक्तंततः।अंतर्दशाहस्य
तांचेत्पुनर्मरणजन्मनी· तावत्स्यादशुचिर्विप्रोयावन्नस्यादनिर्दशं॥इतिमनुः।अस्याव्या ७
ख्यापंचितेवदशाहागमः पूर्वस्यांत्यदिनेयदिद्विदिवसात्· पूर्वस्यजन्मयलक्षणाशौचमध्ये

अंत्यदिनेरात्र्यादौयदितुर्ज्यंदशरात्राशौचंपतति· ततस्तदग्रतोद्विदिवसेनशुद्ध्येतगच्छेत्· अ
त्रदिनशब्देनरात्रयोग्रह्यंति· यतः रात्रिशेषेणाद्यहात्शुद्धियामिशेषेत्र्यहादितिशातातपः।
प्रभातेत्र्यहात्· प्रभातेरात्रिशेषेत्र्यहाद्दितिप्रपंचः।अंस्ये· प्राक्व्याख्यातः।।५।। ।।अथ
षष्ठंवृत्तमाह।। ।।उत्पन्नेत्रिदिनंमृतेप्युपनयाद्दूर्ध्वंसमानोदकेपुत्रेचैवमनोरसेन्यपित्रजे
प्रेतेतथासोदरे।मातृभ्रातृपितृष्वसृश्वसुरतत्पत्न्यर्त्विजांगाचार्यतज्जायतत्सुतयाज्यशि
ष्य·टइसंप्राप्तेषुचाज्ञातिषु।।६।। ।।उत्पन्नेत्रिदिनंसमानोदकइत्यनुवर्त्तते· समानोदकेआ
चतुर्दशपुरुषात्· उत्पन्नेजातेत्र्यहंत्रिदिनंसूतकं· यतः जन्मन्येकोदकानांतुत्रिरात्राच्छुद्धिरिष्य
ते· इतिमनुः।सपिंडतानुपुरुषेसप्तमेविनिवर्त्तते· समानोदकभावस्तुजन्मनाम्नोरवेदने· इत्य
नुवर्त्तते· तस्मिन्नुपनयाद्दूर्ध्वंपाणिग्रहणाद्नंतरं· मृतेपित्रिदिनंस्यात्· यदुक्तंस्यात्· अथवू
ताद्दशदिनंजन्मन्यपीच्छंसदेतिजन्मसूत्तकं· व्रताउपरिशावंतुर्ज्यंअतोजन्मनिच्यहमितिव्रते

पि॰ पुत्रे चैवमनौरसे अनौरसे दत्तकृत्रिमादिपुत्रे जाते मृते एवं त्रिरात्रं॰ यतः अनौरसेषु पुत्रेषु जा
तेषु च मृतेषु च॰ परपूर्वासु भार्यासु प्रसूतासु मृतासु च॰ त्रिरात्रमत्र प्रकृतमिति विज्ञेयः। अन्यापि
गृह्ये प्रेते तथा सोदरे एकस्यां मातरि द्वितीये पितुर्जनका जाते सोदरे प्रेते त्रिरात्रमनुवर्त्तते॰ यतः
मात्रैकया द्विपितृकौ भ्रातरावन्यगोचरौ॰ एकाहं सूतकं तत्र त्रिरात्रं मृतके तथा। इति मरीचिः।
एकाहं त्र्यहमिति पक्षिणी ग्रहणं॰ गोचरौ नानागृह निवासिनौ॰ मातृभ्रातृपितृमातामहस्वस
स्वसृभगिनीकन्याशौचे॰ सूतास्वासु मृतासु चेति॰ प्राकृतहृदिनं तत्पक्षस्य प्रोक्तं तत्किमिदं पुनः।
स्वसृग्रहणं उच्यते॰ जीवति पितरि भगिन्यादिनमेकमाशौचं॰ प्रेते पितरि भ्रातृगृहे गृहे अपि
वा भ्रातुः स्वसुः प्रमीतायां किमिति॰ अत्र माद्यसने गृह्यते॰ यतः पित्रोस्तत्सङ्गेषु वक्ष्यति॰ अनु
रुपनेतात्मतन्त्यो मातुलानी मातामही स्वश्रू गृह्यते॰ भगिन्यां भगिनी भावः। तत्र भगिनीप ८
ति गृह्यते॰ साहचर्यात्॰ ऋत्विक्र्कयज्ञे वृतः। आचार्य उपवीतदाता तदनुवेदाध्यापकः। तन्नाय

ऋत्विगाचार्यभार्ये॰ तत्सुतौ तत्तनयौ॰ याज्ययजमानं शिष्यो ऽनुवेदाभ्यासी एतेषु स्वगृहे
षु प्राप्तेषु त्र्यहमाशौचं॰ वाशब्दात् अन्यत्रापि स्थितेषु यतः सपिंडेषु वेश्मनि मृतेषु एका
हमिति वसिष्ठः॥६॥ ॥अथ सप्तमवृत्तमाह॥ ॥पित्रोस्तत्सङ्गेषु तत्सुतपितृष्वन्योन्य
तः पक्षिणी स्यादेकाध्ययनेपि सा गुरु सुहृन्नृपश्च शुर्येषु दुः। स्पृष्टेऽस्थित्रिदिनं दिनं चावि
रसे बुध्या घ्नवाचामकोशिष्टं नो कुरघेन शुद्धमधिकं मोहाद्दिनं चापदि॥७॥ ॥पित्रो
स्तत्सङ्गेषु तत्सुतपितृष्वन्योन्यतः पक्षिणी स्यादेकाध्ययनेपि सा॰ मातापित्रोः सङ्गेषु
उक्तदिनरत्नादि सङ्गेषु॰ सङ्गशब्देन भ्रातृभगिन्यो उच्यते॰ ततः पितृसङ्गोपि पितृव्य
कः। सपिंड एवेति॰ मातृसङ्गो मातुलः प्राकृतत्त्वेगदितः। अतस्तदपेक्षयाधिकं पितृष्वस्रा
दयः। तत्सुताः पितृष्वास्त्रया मातृष्वस्रेया मातुलादयः। तत्पतयो पितृष्वसृपतिः मातृष्व
सृपतिः एते घ्न्यन्योन्यं मिथः पक्षिणी रात्रिराशौचं भगिनी स्यात् नवेव॰ पक्षिणी लक्षणं तु

नयतोप्यह्नीपक्षाविवयस्याराभ्याः सातयोक्ता· आत्मपितृमातृबांधवाः योनिसंबंधाः
लक्ष्यंते· यतः पित्रोः स्वसरिचभ्रेते· पितृष्वस्राश्चयेपुत्रामातृष्वस्रास्तथैवच· तत्पत्नीमातु
लेयस्यसात्वंतत्पक्षिणींक्षिपेत्· इतिस्मृत्यंतरं· दौहित्रे च भगिन्यांसंस्थियांचभ्रातर्यपि
चसंस्कृते· पुत्रेजामातरिभ्रेतेदौहित्रेभगिनीसुते· शालिके तत्सुते चैवसद्यः स्नानंविधी
यते· भ्राता दत्तकृत्रिमपुत्रतद्विधवृत्ति· एकाध्ययनेपिएकाध्यायीसमशाखाध्यायीत
स्मिन्मृतेसामक्षिणीयतः।एकशाखाध्यायीश्रोत्रियः।इतिबौधायनः।गुरुः सुहृन्नृपस्वसु
र्यध्यहः।गुरुएकदेशाध्यापकः।सुहृन्मित्रं· नृपोराजा· स्वसुर्जेस्विसुर्जाता· स्वसुर्भगिनी
मः।एतेषुप्रेतेषुअहः।एकंदिनंआशौचं· यतः ग्रामेश्वरेयतः।ग्रामेश्वरेकुलपतौश्रोत्रि
येवातपस्विनी· शिष्येपंचत्वमापन्नेशुचिर्नक्षत्रदर्शनात्।।इतिवृद्धमनुः।स्पृष्टेस्थित्रिदिनं। २
मातुषास्थिसरसंस्पृष्टात्रिदिनमाशौचं· किंतु· बुद्ध्यास्पृष्टेष्टर्वंअघवत्स्नानं· आचमनं·

आशौचं· दिनंतुवेरसंस्पृष्टेआप्लवनाचमनंदिनं अज्ञानात्नकिमपि· यतः क्षत्रियानुगमनेचमा
मानुषास्थिस्निग्धंस्पृष्ट्वात्रिरात्रमाशौचं· अस्थिस्निग्धेत्वहोरात्रं· शवानुगमनेचैवेति· वसिष्ठः
शिष्टंनोक्तुरघेन आशौचिनीगृहेनोक्तुर्भोजनंकुर्वतोनरस्याशिष्टात्दशादिनमध्याच्छेषादि
नादिआशौचं· यतः लघन्नमत्तिवुतेषांदशाहेनैवशुध्यंति· मनुः।ब्राह्मणाशौचेयासकृदेव
मश्नाति· तस्यतावदाशौचं· यावत्तेषामितिविष्णुः।अत्रशुद्धावधिकं· मोहात् अज्ञानात् यदि
अघिनांगृहेभोजनंकुरुतेतदायावत्अशुद्धिः।अन्नंजीर्यतितावदेवावधिः।आशौचंस्यात्
यतः अंतर्दशाहेभुक्त्वान्नं· सूतकेमृतकेपिवा संस्पर्शोन्निवेत्तावद्यावदन्नंव्रजत्यधः।इत्यंगि
राः।दिनंचापदि· आपदिक्षुधयाःपीडायाः भोक्तुसूतकिनां अन्नं खादतः दिनमाशौचं· यतः
आपद्गतः संप्रगृह्णान्भुंजानस्तुयतस्ततः।नालिप्यैवेनसाविप्रोज्वलनाग्निसमादितः।इतिस्मृ
त्यंतरं।।७।। ।।अथाष्टमंह्रन्नमाह।। ।।सद्यः स्यान्नृपकारुदासभिषजांकृत्येषमात्यस्यचा

कष्टायस्तु चर्ष्टर्वसंन्नृतमखोद्वाहोत्सवादिष्वपि। कृछ्रादिष्वगृहाश्रमेषु वसतां प्रेते यतौ निंदिते
गोब्राह्मणादिनिरिच्छितां च मरणेन तत्रापि विधेन्निर्दे॥ ॥ ॥सद्यः स्यात्कृन्नृपकारुदासभिषजां कृ
त्येषु नृपो दशमंडलग्रामाधिपो निवाधामी। कारवो नर्त्तकंडुकादयः। दासो वेतनदासः नन
क्तदासः। वेतनेन मूल्येन येकर्माणि कुर्वंति मूल्यवित्तादयः। नक्तदासस्य आशौचं स्वामितुल्यं
स्यात् वक्ष्यति। भिषजो वैद्याः यद्यपि नरराजाश्ववैद्या सामान्येनोच्यंते तथापीह नरवैद्या ए
व गृह्यंते। यतस्ते विप्रादयश्चिकित्सा। तेषां तु आशौचादिसंपर्कः। किंतु पशुवैद्यानां चिकित्सितं
पशूनां न। आशौचस्पर्शसंबंधः। अतो भिषजो नरवैद्या अमीषां कृत्येषु। एतैः साध्यमानं
कार्यविषये अमी स्पर्शयोग्या एतेषां कर्मविषये सद्यः शुद्धिः। स्पर्शनं स्यादिति। न पुनर्धर्मा
दिविधेयथाह। कारवः शिल्पिनो वैद्या दासा दास्यस्तथैव च। राजानो राजभृत्याश्च सद्यः शौ
चाः प्रकीर्त्तिताः॥ इति प्रचेताः। चिकित्सकोयत्कुरुते न तदन्येन शक्यते। तस्मात् चिकित्सकस्य १०

शौचं शुद्धो भवति नित्यशः॥ ऋत्विजां दीक्षितानां च यज्ञियं कर्म कुर्वतां। सत्रिव्रतिब्रह्मचारिदातृ
ब्रह्मविदां तथा। इति योगीश्वरः। आमात्यस्य वा। अमात्यस्य मंत्रिणः चापि वाशब्दो चकारा
र्थे। कष्टापत्सु चर्ष्टर्वसंन्नृतमखोद्वाहोत्सवादिष्वपि। कष्टापदीत्र दुर्भिक्षाद यो गृह्यंते। एवं आ
शौचादर्वाक् संन्नृत उपस्नृतो मखो यज्ञ उद्वाहो विवाहः उत्सवः पुत्रचूडाकरणादि संन्नृता
न्नानां पक्वान्नानां विषये विप्लवमाने प्रारब्धेषु सद्यः शौचं स्यात्। यतः दाने विवाहे यज्ञे वा सं
ग्रामे देशविप्लवे। आपद्यपि च कष्टायां सद्यः शौचं विधीयते॥ इति योगीश्वरः। विवाहोत्सवय
ज्ञेषु अंतरामृतसूतके। पूर्वसंकल्पितार्थेषु न दोषः परिकीर्त्तितः। इति बृहस्पतिः। कृछ्रादि
कृछ्रादिव्रतं चरतः अपिशब्दात् ब्रह्मचारिव्रतं चरतः यावद्व्रतस्य समाप्तिः। तावत् सद्यः शौचं
तेषां धर्मकृत्याधिकारोस्ति। यतः उक्तं प्राक् सत्रिव्रतिब्रह्मचारी इति किंतु ब्रह्मचारिणां मृते
सपिंडानां सद्यः शौचमिति निराकार्यं। अगृहाश्रमेषु वसतां प्रेते यतौ निंदिते। अगृहाश्रमो वा

न प्ररुष्ठः तपायम्निवीरदंडी॰ एकदंडी ब्रह्मविद्याविदितः। लोकगर्हितः। प्रेते सर्वत्र एकवचनं संबध्यते॰
एतेषु प्रेतेषु मृतेषु सद्यस्तत्कालं शुद्धिर्भवति॰ यतः मृते च कृतसन्यासे सद्यः शौचं वनस्थिनो॰ इति परा
शरः। पाखंड्यनाश्रितास्तेनाश्च र्द्रध्यः कामगादिकाः। सुराप्य आत्मघातिन्यो नाशौचोदकभाजनाः।
इति योगीश्वरः। एते निंदिताः अनाश्रितासत्यधिकारे अनाश्रमिणः। अकृताश्रमविशेषाः। गोब्रा
यादिभिरिच्छतां च मरणे गोशब्दात् सर्वशृंगिणो दंष्ट्रिणो गृह्यंते॰ प्रायः प्रायोप्रवेशनं तुल्यादशनं॥
आदिशब्दात् भृगुपाते॰ नानादि गृह्यते॰ एवं बलात् मरणमिच्छतां दर्पादिना कृतमरणानां सपि
डानां मरणे सद्यः शुद्धिः। बुद्धिपूर्वं मृतेषु नाशौचं स्यात्॰ प्रायोनशनकशस्त्राग्निविषोदकोद्बंधने॰
प्रपतनैश्चेच्छतां॰ इति गौतमः। ब्रुवादेनदोषः। तत्रापि बोधयन्नदं॰ तत्रापि च प्रथमद्वितीयादिषु बोधविधे
पूर्वं मरणे सपिंडानां त्र्यहमाशौचं॰ यतः वृद्धः शौचस्मृतेर्लुप्तः प्रत्याख्यातो भिषक्क्रिया॰ आत्मानं ११
घातयेद्यस्तु भृग्वग्नि— नशांबुभिः। तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसंचयः। तृतीये तूदकं कुर्याच्चतु

र्थे श्राद्धमाचरेत्॥ इति स्मृत्यंतरं॥ ८॥ ॥ अथ नवमं प्रकरणमाह॥ ॥ निर्हरिमृतवन्मृतान्नरहिते
स्त्रीणां न्यवासेदिनं सज्योतिस्तु बहिर्भूतो द्विगुणितं धर्मे सचैलाप्लवः। रोदे स्नानमितेस्थिचा
चमनकं दीने पुराव्याप्लवो शूद्रे द्वित्रिदिनं निशाद्यनुगतो वक्ष्यादियुक्तं च तत्॥ ९॥ नि॰ ॥ नि
र्हरिमृतवयज्जातीयं प्रेतं निर्हरंति वहंति॰ यज्जातियुक्तमाशौचं तस्य भवति यथा विप्रस्य शूद्र
निर्हरणे दिनं ३०॰ शूद्र विप्रनिर्हरणे दिन १०॰ एवं क्षत्रियादिषु ज्ञेयं॰ किंतु देहेन शवनिर्हरणं क
त्वा तद्गृहे न मत्तिवसति॰ च॰ दशाहिनाशौचमसहस्य॰ एतत्सज्जातीयविषयं॰ यतः अधरस्य—
——— पूर्वं वर्णमुपस्पृशेत्॰ पूर्वो वापरं तत्र पूर्वोक्तमाशौचमिति गौतमः। पूर्वोक्तं शूद्रस्य वि
प्रे दशदिनलक्षणं॰ विप्रस्य शूद्रे समानलक्षणमिति॰ मृतान्नरहिते स्त्रीणां सपिंडस्य शौचे गृ
हे भोजनवर्जं मृतस्य त्रिदिनमाशौचं भवति॰ यतः असपिंडं द्विजं प्रेतं विप्रो निर्हृत्य बंधुवत्॰ विशु
ध्यति त्रिरात्रेणेति मनुः। बंधुवत् स्निहेन॰ अन्यदा से दिनं॰ असपिंडोर्थे इनरदहति॰ न भुंक्ते तद्दिनाशौ

चन्नाकृन्नवति· यतः अन्नादितअन्नमश्नैवनचेत्तस्मिन्गृहेवसेत्· इतिमनुः।सज्योतिस्तुबहि
र्गतः।प्रेतस्पर्शोग्रामंनप्रविशेयुः।पुनरानक्षत्रदर्शनात्· रात्रौचेदादित्यस्येति· हारीतः।सज्यो
तिःपदव्याख्यानिदर्शनेवर्त्तिमतः।सूर्यो द्विगुणितं· नरान्नत्यामूल्येनवाहं इतिकिंतुसपिंडा।
तेषांद्विगुणितंज्योतिः।दिनद्वितयमित्यर्थः।धर्मेसचैलाप्लवः।यः असपिंडाधर्मेणशावंवह
तितेषांसचैलाप्लवः।सवस्त्रस्नातःशुद्धिः।यतः।।अनाथंब्राह्मणंप्रेतंयेवहंतिद्विजोत्तमाः।
पदेपदेयज्ञफलंअनुपूर्वंलभंतिते।।नतेषांअशुभंकिंचित्पापंवाशुभकर्मणां।जलाव
गाहनात्तेषांसद्यःशौचंविधीयते।।इतिपराशरः।शेदेस्नानंयदिस्नेहात्सपिंडस्तगृहेगत्वा
रोदेति· तदास्नानमितिमात्रं· यतः।सर्वस्यैवहिमृतस्यबांधवैःसहाश्रुपातंकृत्वास्नानेन
कृतेअस्थिसंचयेसचैलस्नानेनेतिविष्णुः।शंखः।इतिअस्थिवाचमनकंअस्थिसंचयनाहे २२
हिस्नानंवाशब्दात्· आचमनं· अपस्पर्शंकृत्वाशुद्धःयतःएतदीयदृष्टांतंप्रागेवदर्शितं।।छ

अकृतेस्थिसंचयेसचैलस्नानंसवर्दिवकृतेसंचयनेस्नानंआचमनंवा· हीनेषुराज्याप्लवौ· अ
नुरागस्येच्छयाप्रेतंज्ञातिमज्ञातिमेववास्नात्वासचैलंस्पृष्ट्वाग्निंघृतंप्राश्यविशुध्यति· इतिमनुः
इतिहीनेषुराज्याप्लवावितिपदव्याख्या।दृष्टांतेनैवगतार्थाः।शूद्रेतुविनयंयतः।प्रेतीभूतंतुयच्छू
द्रंब्राह्मणोज्ञानदुर्बलः।अनुगच्छेन्नीयमानंसत्रिरात्रेणशुध्यति· चतुर्थेहनिसंप्राप्तेनदींगत्वा
समुद्रगां।प्राणायामशतंकृत्वाघृतंप्राश्यविशुध्यति· इतिपराशरः।अनुशब्देसहार्थेशूद्र
स्यशवेनसहगच्छन्विप्रयाति· क्षत्रियानुगमनेपित्रिरात्रमितिशंखः।निशाद्यनुगतोयद्वाद्वि
जोविप्रोमृतंशूद्रं· ज्ञात्वास्नेहात्तंदृष्ट्वा अनुपश्चाद्गच्छति।नसज्ञात्।तदानिशाशौचं· अपिशा
ब्दात्सचैलंस्नानमपिब्राह्मण्यादियुक्तंचतत्· तत्सर्वमपिशवानुगमनाशौचं· प्रीत्याधर्मे
णवाशवसहगमनेअनुगमनेच· वक्ष्यपिवक्ष्यादियुक्तंकार्यं· त्र्ययमर्थः।दृष्टांतेनैवप्रकटि
तस्यात्· यतःदग्ध्वाआगताःसंतोद्वारुकृजननेवक्ष्यादिकर्मविरमानाःद्वारिकुर्वंति· आच

नि२

ख्याख्याधिसलिलंगोमयंगोरसर्षपान्‌ प्रवेशेयुःसमालभ्यकृत्वावेश्मनिपदंशनैः॥इतिया
ज्ञवल्क्योक्तेश्च॥९॥ ॥अथदशमंवृत्तमाह॥ ॥क्षत्रेद्वादशविंशत्‌विंशिनिशात्रिंशच्चशूद्रे
क्रमात्‌विप्राद्द्वित्रिचतुर्गुणंवयसिसच्छूद्रेपिपंचाक्षुरोक्तास्त्रीयुतशिष्यदासभृतकान्
नादिवद्धांधवेद्दीनेस्वलघुवानदीयमधिकेशूद्रैःसमाःसंकराः॥१०॥ ॥क्षत्रेद्वादशविंश
तिर्विंशिनिशात्रिंशच्चशूद्रेक्रमात्‌ अत्रदृष्टांतेव्याख्यायतः॥क्षत्रस्यद्वादशाहानिविशःपं
चदशैवतु त्रिंशाद्दिनानिशूद्रस्यतदर्द्धन्यायवर्त्तिनः॥इतियोगीश्वरः॥क्षत्रस्यषोडशाहानि
इतिबौधायनः॥अत्रविशःपंचदशादिनानीतिसामान्येनविंशतिदिनानिस्फलप्रतिपादनन
पराणितथा सर्वेषामेववर्णानांसूतकेमृतकेतथा दशाहाच्छुद्धिरथवा इतिशातातपोक्त
वीत्‌ इत्यंगिराः॥विप्राद्द्वित्रिचतुर्गुणंवयसि वयसित्रिवर्षादिरुपेतयोर्निमित्तावस्थयत्‌ वि
प्रेत्रिदिनमाशौचंभवेत्‌ ततःक्षत्रेद्विगुणं वैश्येत्रिगुणं शूद्रेचतुर्गुणमिति द्वित्रिचतुर्गुणं १३

रात्रयःसंबध्यते यथा यत्तुत्रिरात्रंविप्राणामाशौचंसंप्रकीर्त्तितं तच्छूद्रेद्वादशाहं षण्णवक्षत्र
वैश्ययोः॥इतिऋष्यश्रृंगः॥विप्रेहीनेत्रिनिर्वीर्येमृतेशुद्धिस्तुनैशिकी द्व्यहेत्रक्षत्रयोःशुद्धिस्त्रिभि
र्वैश्येमृतेतथा निवृत्तचूडकेविप्रेत्रिरात्राच्छुद्धिरिष्यते निहतेक्षत्रियेषड्भिःवैश्येनवभिरुच्य
ते शूद्रेत्रिवर्षान्न्यूनेतुशुद्धिःस्यात्पंचभिर्दिनैः॥अतऊर्ध्वंमृतेशूद्रेद्वादशाहोविधीयते वर्षष
ण्मतांतोयःशूद्रःसंम्रियतेयदि मासिकंचभवेच्छौचंइत्थंवदंतिचांगिराः॥सच्छूद्रोपिपंचास्य
--संस्कारेणपंचयज्ञान्नदापयेत्‌ इतिसच्छूद्रेप्रवर्त्तमानेतस्यसुतादेश्चुरकर्मरहितस्यपंचदि
नानिआशौचंभवति उक्तास्त्रीसुतशिष्यदासभृतकाद्धिनर्त्तादिवत्‌ स्त्रियोत्रचातुर्वर्ण्यपत्न्यःसु
सुनोरसादिद्वादशशिष्ययोगृहेभुंक्तेगृहेवासी प्राकृउक्तशिष्यःकवलंगृहवासगनशीलः
अयंगृहेरहितेअशनादिकर्त्ताशिष्योअंतेवासीकलाशास्त्राद्दोपागकः॥दासीभक्तदासःहासाः
पंचदशस्मृत्यंतरेउक्ताः॥तद्गेहेयेरुभृतकोयंगृहेत्पानोजनग्रासादिदिहाकिलादिकर्मकारास्ते

षांजन्मर्दवत्स्वामिवदाशौचंयतः।मृतेसूतौचदासीनांपत्नीनांचानुलोमतः।स्वामितुल्यंभवेच्छौचंमृ
तेस्वामिनिपातनं·इत्यंगिराः।बांधवेहीनेस्वंलघुव––त्रहृष्टांतेनव्याख्यानं·दशाहाच्छुध्यतेविप्रोज
न्महानौस्वयोनिषु·षड्भिस्त्रिभिरथैकेनक्षत्रविट्शूद्रयोनिषु·इतिहारीतः।क्षत्रियस्यविट्शूद्रे
षुसपिंडेषुषड्रात्रत्रिचत्रिभिर्व्यावैश्यस्यतुशूद्रेसपिंडेषड्रात्रेणशुद्धिरितिविष्णुः।हीनेबांधवेमृते
उत्तमेनस्वअशौचं·कार्यं·लघुवात्रिरात्रमेव·यतोलघुत्वंत्रिरात्रस्यैवापद्यते·यतःप्रागुक्तं·त्रि
रात्रंदशरात्रंवाब्राह्मणमाशौचमिष्यते·इतितदीमाधिके·हीनवर्णानांउत्कृष्टेषुसपिंडेषुजातेषुमृ
तेषुवातदाशौचव्यपगमेशुद्धिरितियतः·क्षत्रविट्शूद्रजातीयायेस्युर्विप्रस्यबांधवाः।तेषामा
शौचेविप्रस्यदर्शनेशुद्धिरिष्यते·शूद्रैःसमाःसंकराः।ब्राह्मणक्षत्रियोवैश्यस्त्रयोवर्णाद्विजातयः
शूद्रस्तुरीयवर्णस्यात्तद्भेदास्त्वंत्यजाःस्मृताः।अंबष्ठपारशवरथकारादादयः।तेचस्मृतिषुप्रसिद्धाः १४
संकरजातीयाःमिश्रजातीयाः·तेशूद्रैःसमाःशूद्रतुल्यं·एतेषांआशौचं·अत्रप्रश्नूयतेशूद्रस्यनाधिका

हीनविप्रप्रतिषेधस्त्रिंशद्दिनस्तुनैशिकी·छद्देनक्षत्रियोशुद्धिस्त्रिभिर्वैश्येमृतेतथा·निवृत्तकेविप्रेत्रि
रात्राच्छुद्धिरिष्यते·निवृत्तेक्षत्रियेषड्भिर्वैश्येनवभिरुच्यते·शूद्रेत्रिवर्षेन्मृतेतुशुद्धिःस्यात्पंचभि
र्दिनैः।अहोरात्राणीत्येके·इतिप्रचेताः।इदंतुपूर्वकाल्यआशुद्धुडिति·अस्माद्भवतीतिशूद्रः।
सतस्यनसूतकशावेस्तः।एकत्रिंशद्दिनानामनुकल्पः।तत्रसंकराणांकल्पएवउपायात्·नाशौ
चंतेषांयतः।प्रतिलोमाधर्महीना।इतिस्मृत्यंतरं·तेषांकेवलंप्रसूतौमृतौवामलापकर्षणीय
स्नानंनशूद्रस्यप्रथमकल्पोंगीकृतइतिशूद्रोधन्यइतिव्यासवाक्यात्·शूद्रःधर्मसंकरणमा
घ्रतः।धन्यःशाद्दीमंगलवाचकइति॥ ॥इतिआशौचदशकनाम्नंहरिहरविरचितंसमाप्तं॥ ॥
स्वस्तिसंवत१८४६वर्षेशाके१७११प्रवर्तमानेचैत्रकृष्णनवम्यांगुरुवारेणलिखितंसूर्यपुरवास्त १५
व्येनाभ्यंतरनागरज्ञातीयेनद्विवेदीपनामककृष्णदेवात्मजःशिवदेवेन॥अमदावादग्रामे॥श्री